श्री नृसिंह कवचं (त्रैलोक्यविजयं)

श्री नृसिंह कवचं (त्रैलोक्यविजयं)

नारद उवाच |
इंद्रादिदेववृंदेश ईड्येश्वर जगत्पते |
महाविष्णोर्नृसिंहस्य कवचं ब्रूहि मे प्रभो |
यस्य प्रपठनाद्विद्वांस्त्रैलोक्यविजयी भवेत् || 1 ||

ब्रह्मोवाच |
शृणु नारद वक्ष्यामि पुत्रश्रेष्ठ तपोधन |
कवचं नरसिंहस्य त्रैलोक्यविजयी भवेत् || 2 ||

स्रष्टाऽहं जगतां वत्स पठनाद्धारणाद्यतः |
लक्ष्मीर्जगत्त्रयं पाति संहर्ता च महेश्वरः || 3 ||

पठनाद्धारणाद्देवा बहवश्च दिगीश्वराः |
ब्रह्ममंत्रमयं वक्ष्ये भ्रांत्यादिविनिवारकं || 4 ||

यस्य प्रसादाद्दुर्वासास्त्रैलोक्यविजयी भवेत् |
पठनाद्धारणाद्यस्य शास्ता च क्रोधभैरवः || 5 ||

त्रैलोक्यविजयस्यास्य कवचस्य प्रजापतिः |
ऋषिश्छंदस्तु गायत्री नृसिंहो देवता विभुः || 6 ||

चतुर्वर्गे च शांतौ च विनियोगः प्रकीर्तितः |
क्ष्रौं बीजं मे शिरः पातु चंद्रवर्णो महामनुः || 7 ||

ॐ उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं |
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं || 8 ||

द्वात्रिंशदक्षरो मंत्रो मंत्रराजः सुरद्रुमः |
कंठं पातु ध्रुवं क्ष्रौं हृद्भगवते चक्षुषी मम || 9 ||

नरसिंहाय च ज्वालामालिने पातु कर्णकं |
दीप्तदंष्ट्राय च तथा अग्निनेत्राय नासिकां || 10 ||

सर्वरक्षोघ्नाय तथा सर्वभूतहिताय च |
सर्वज्वरविनाशाय दह दह पदद्वयं || 11 ||

रक्ष रक्ष वर्ममंत्रः स्वाहा पातु मुखं मम |
तारादिरामचंद्राय नमः पातु हृदं मम || 12 ||

क्लीं पायात् पार्श्वयुग्मं च तारो नमः पदं ततः |
नारायणाय नाभिं च आं ह्रीं क्रों क्ष्रौं च हुं फट् || 13 ||

षडक्षरः कटिं पातु ॐ नमो भगवते पदं |
वासुदेवाय च पृष्ठं क्लीं कृष्णाय उरुद्वयं || 14 ||

क्लीं कृष्णाय सदा पातु जानुनी च मनूत्तमः |
क्लीं ग्लौं क्लीं श्यामलांगाय नमः पायात् पदद्वयं || 15 ||

क्ष्रौं नृसिंहाय क्ष्रौं ह्रीं च सर्वांगं मे सदाऽवतु |
इति ते कथितं वत्स सर्वमंत्रौघविग्रहं || 16 ||

तव स्नेहान्मया ख्यातं प्रवक्तव्यं न कस्यचित् |
गुरुपूजां विधायाथ गृह्णीयात् कवचं ततः || 17 ||

सर्वपुण्ययुतो भूत्वा सर्वसिद्धियुतो भवेत् |
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः || 18 ||

हवनादीन् दशांशेन कृत्वा सत्साधकोत्तमः |
ततस्तु सिद्धकवचो रूपेण मदनोपमः || 19 ||

स्पर्धामुद्भूय भवने लक्ष्मीर्वाणी वसेन्मुखे |
पुष्पांजल्यष्टकं दत्त्वा मूलेनैव पठेत् सकृत् || 20 ||

अपि वर्षसहस्राणां पूजानां फलमाप्नुयात् |
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि || 21 ||

कंठे वा दक्षिणे बाहौ नरसिंहो भवेत् स्वयं |
योषिद्वामभुजे चैव पुरुषो दक्षिणे करे || 22 ||

बिभृयात् कवचं पुण्यं सर्वसिद्धियुतो भवेत् |
काकवंध्या च या नारी मृतवत्सा च या भवेत् || 23 ||

जन्मवंध्या नष्टपुत्रा बहुपुत्रवती भवेत् |
कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः || 24 ||

त्रैलोक्यं क्षोभयत्येवं त्रैलोक्यविजयी भवेत् |
भूतप्रेतपिशाचाश्च राक्षसा दानवाश्च ये || 25 ||

तं दृष्ट्वा प्रपलायंते देशाद्देशांतरं ध्रुवं |
यस्मिन् गृहे च कवचं ग्रामे वा यदि तिष्ठति |
तद्देशं तु परित्यज्य प्रयांति ह्यातिदूरतः || 26 ||

इति श्रीब्रह्मसंहितायां सप्तदशोऽध्याये त्रैलोक्यविजयं नाम श्री नृसिंह कवचं |